সংস্কৃত বিভাগ

অনার্স: সেমিস্টার-II

পেপার: IV (SANS-H-CC-T-04)

শিক্ষিকার নাম: ড. [illegible]

Section-C (Unit-II)

## 1) राष्ट्रीयैकता

भारतवर्षस्य वैदिकः कालः संगठनात्मकदृष्ट्या स्वर्णयुग आसीत् यत्र महर्षिभिः कामना कृता यत - 'संगच्छध्वम संवोमनांसि जानताम्' 'भद्रं कर्णेभिः शृणुयाम देवाभद्रं पश्येमाक्षभिः' 'माता नः पृथिवी पुत्रोऽहम पृथिव्याः इत्यादिकम् । वेदोपबृंहण-परायणा अपि प्राहुः - 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्' 'वसुधैव कुटुम्बकम्' इति च।

इयं मानवमात्रस्य कल्याणकामना भारतस्यैव संस्कृतौ समुपलभ्यते। अत्रैव जनाः विश्वकल्याणकामनया कार्याण्यकार्षुः। अस्यैव देशस्य विदुषां सविधे उपविश्य जनाः चारित्र्यादिकस्य शिक्षामाप्नुवन्ति स्म। तथाच आहुः भगवान् मनुः —

"एतद् देशप्रसूतस्य सकाशाद् अग्रजन्मनः।
स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ इति।

अत्रैव आचार्याः शङ्कररामानुजवल्लभनिम्बार्कमध्वप्रभृतयः समेषां जगति जनिमतां जननमरणपद्धवीआद्यालानामामोद्धराय समवाप्तये च परमां शान्तिम् आजीवनं समाजोपदेशस्य निःस्पृहतया कार्याण्यकार्षुः।

परन्तु दैवदुर्विपाकात जनेषु मतभेदस्य पाश्चात्यानां षडयन्त्रमयेन कार्येण प्रसारः संजातः। पाश्चात्यया एव भारतीयायां जनतायां वैरस्य प्रचुरं प्रसारमकार्षुः। वर्गेषु तेषु तेषु मतभेदः प्रासरत्। अस्यारम्भस्तु तदाभूत यदायमखण्डः भारतः भारत-पाकिस्तानरूपेण विभक्तोऽभूत, एक एव महान् देशः देशद्वयरूपेण विश्वस्मिन् विश्वे प्रख्यातोऽभूत्।

पुनः स्वतन्त्रे भारते राजनीतिज्ञानां अतीव कष्टप्रदं साम्राज्यं संजातम्। परश्चेयं राजनीतिरपि सम्पूर्णमेव देशं विनाशोद्यतराजनीतिरूपेणोद्भूय

(2)

यितुम् आतिष्ठन्ते । इमे राजनीतिज्ञाः एव समीहितसाधनाय वश्ययितुमखिलं समाजमखिलां जनताम् च तथा तथा प्रयतन्ते । कांग्रेसजनतादल-भारतीयजनतापार्टीकम्यु-निस्टलोकदलादिकानि यानि कान्यपि संगठनानि साम्प्रतम् समुपलभ्यन्ते तानि सर्वाण्येव एव समीहितसाधनपराण्येव पार्यन्तिकविचारे कृते सति प्रतीयन्ते । देशस्य सत्तायाम् केन प्रकारेण समाधि-कारो जायेत एतदर्थमेव सर्वदलीयाः राजनीतिज्ञाः प्रयतन्ते ।

अद्य खालिस्तानसमर्थकानामुग्रवादः, काश्मीरं विनाशयितुमुग्रवादः इत्यादिरूपेण देशे सर्वत्रोग्रवादस्य प्रचुरः प्रचारो विलोक्यते ।

एतद् सर्वम् राष्ट्रीयैकतायाः विरुद्धं वर्तते । यदि सर्वे राजनीतिज्ञा पारस्परिकं मतभेदं विस्मृत्य देशस्य सुखसमृद्धये प्रयत्नं कुर्युः तर्हि नूनमिदम् प्रतीयमानं संकटं विनश्येत । भाषाविषयको विवादः, धर्मविषयको विवादः, दलविषयको विवादः, उग्रवादः पृथकतावाद-विवादः, एतत् सर्वमेव अस्माकं बुद्धेः विकारमात्रं वर्तते । अस्माभिः सर्वैरवगमेवावगन्तव्यम् यत् वयं न तु बङ्गीयाः न वा नेपालप्रदेशीयाः विहारप्रदेशीयाः स्मः न वा औत्तराहीश्च भारतीयाः स्मः । अस्माकं वयं सर्वे दाक्षिणात्याः सर्वेषामेक एव देशो वर्तते भारतवर्षम् । अस्य देशस्य सर्वे वासिनः परस्परं बान्धवाः सन्ति वर्तते यादृशाय देशस्य राष्ट्रभाषा वर्तते । राष्ट्रभाषायाः सहायिकाः सन्ति सर्वाः भाषाः याः याः अस्य देशस्य सर्वे वासिनः परस्परं बान्धवाः सन्ति यादृश्य देशस्य राष्ट्रभाषा वर्तते । राष्ट्रभाषायाः सहायिकाः सन्ति सर्वाः भाषाः याः याः अस्य देशस्य तस्मिन् तस्मिन् प्रदेशभागविशेषे वा भाष्यन्ते व्यवह्रियन्ते वा ।

येन प्रकारेणैकस्मिन् परिवारे एक एव पुरुषो नियामको भवति । गृहस्याश्रमे जनाः तस्य समर्थकाः भवन्ति, तेनैव प्रकारेण देशस्य राष्ट्रभाषैव मुख्या भाषा भवति, तद्व्यतिरिक्ताः सर्वाः देशस्य भाषाः तस्याः राष्ट्रभाषायाः सहायिकाः भवन्ति यदीत्थमेव सर्वैर्निश्चीयते तदा भाषाविषयको यो हि विवादो देशे

विलोकयते, सः शाम्येत ।

अनेनैव प्रकारेण यदि सर्वे भारतीयाः इदं निश्चयेयुः यत्सर्वे वयं भारतीयाः स्मः । बिहारबङ्गालउत्तरप्रदेशआसामकश्मीरपञ्जाबप्रभृतयश्च प्रदेशाः अस्य भारतस्य अवयवभूताः सन्ति । यदि भारतदेशः समृद्धः, निष्कण्टकः, कलहकोलाहल-रहितो भविष्यति तदास्य देशस्य सर्वे प्रदेशा अपि शान्ताः सुखमयाः समृद्धाश्च भविष्यन्ति । कश्चनापि कुत्रचित् केनापि प्रकारेणोपद्रवो नहि भविष्यति तदा नूनमस्य देशस्य राष्ट्रीयता सुरक्षिता स्यात् । विश्वस्मिन् विश्वे भारतदेशः पुनरपि समुन्नतेः काष्ठां चुम्बेत । पुनरपि भारतदेशः विश्वे गुरुत्वस्य पदमियात् ।

परञ्चैतत् सर्वं तदा भवितुमर्हति यदा स्वार्थमयी राजनीतिः राजनीतिज्ञैः परित्यक्ता भवेत् । राजनीतिज्ञा एव नेतारो नाम्नाभिधीयन्ते । यस्य देशस्य नेतारः स्वार्थसिद्धिं परित्यज्याखिलजनताकल्याणकामनया कार्याणि कुर्युः ।

अस्माकं देशो यदा परतन्त्रीभूत् तदानीमपि एतादृशी स्थितिरासीत् । सम्पूर्णो देशः पृथक् राज्येषु विभक्त आसीत् । सर्वेषां राज्यानां प्रशासकाः पृथक्-पृथक् स्वकीयां सत्ताम् अनुभूयन्ते स्म । परस्परं तेषु विद्वेष आसीत् । राजानः स्वेतरस्य राज्ञो विनाशमकामयन्त । एतादृश्यामेवावस्थायां भारतवर्षस्योपरि यवनानामाक्रमणमभूत् । जयचन्द्रनामकः स्वदेशीय एव एको राजा तस्य सहायकोऽभूत् । साम्प्रतमपि राजनेतारः परस्परं कलहायन्ते । अतएव देशस्य अतीव कष्टमयी स्थितिर्वर्तते ।

साम्प्रतम् पाश्चात्येषु देशेषु राष्ट्रीकतायाः सम्बन्धेनैव प्रायेण मानवाः सम्बन्धा दृश्यन्ते सर्वे हि यौरोपीयाः देशाः प्रायः क्रिश्चियनधर्मस्थाः सन्ति । अस्याः धार्मिकायाः एकतायाः

सर्वेऽपि तेषां तेषां देशानां नागरिकाः स्वम्
स्वम् जापानीन् रसियन् अमेरिकन् इत्यादिरूपेण-
भिन्नयति। अनेन तेषां देशैक्यता दृग्गोचरा भवति।
अनेनैव प्रकारेण प्रदेशजातिधर्मभाषादिकानां
भेदान् विस्मृत्य आत्मानं यदि भारतीयत्वे -
नानुभवेम तर्हि देशैकतायाः अस्याः भावनायाः
महान् प्रभावो जायते।

अनेनैव प्रकारेण यदा भारतस्योपरि
चीनदेशीयानामाक्रमणमभूत् तदाऽस्य देशस्य
वासिनः चीनाक्रमणस्य विरोधमकार्षुः।
भारतस्यैनामेकतामेवावेक्ष्य चीनदेशीयाः
स्वाक्रमणप्रवृत्तेः विरता बभूवुः।

परन्तु साम्प्रतम् तु देशे एतद्विपरीतं
काचन भावना दृश्यते। स्वतन्त्रता दिवसस्य समये
कश्मीरप्रदेशे तत्रत्याः अप्रवासिनः श्रीनगरे पाकिस्ता-
नीयामेव पताकाम् उत्तोलयन्तीति महती
विडम्बना। इमे पथभ्रान्ताः नागरिकाः केन
मोहेन परिगताः सन्ति इत्यनुमातुमपि कठिनं
वर्तते। अस्याः भावनायाः कश्चनापि राजनीति-
ज्ञोऽपि यदि समर्थनं करोति तर्हि स्पष्टरूपेण
सः राष्ट्रद्रोही वर्तते। एतादृशी भावना तु
सर्वदा निन्दनीयैव वर्तते। अतएव वयं यथा
वन्द्या भवेयुस्तदर्थं राष्ट्रैकतायै भाव्यम्।

2) <u>परिवेशदूषणं तत्प्रतिकारश्च</u> :

अस्माकं वासस्थानस्य चतुस्पार्श्वस्य जलं स्थलं
वायुमण्डलं प्रतिवेशी इत्यादिकम् अवलम्ब्य परिवेशः
गठितः भवति। स्वस्थजीवनस्य निर्वाहार्थं
परिवेशस्य शुद्धता अवश्यस्वीकार्या, किन्तु
सभ्यतायाः क्रमविकासेन तस्य भयावहं
दूषणं जातम्।

अद्य भारतवर्षस्य अनेकविधसमस्यानाम्

एका मुख्यसमस्या पर्यावरणशुद्धिः अस्ति। अधुना भोगवादस्य प्राबल्यात्, विज्ञानस्य उन्नतितया, पाश्चात्य सभ्यतायाः करालग्रासेन तथा शिल्पायनज्ञानस्य विप्रसारेण च भारत-भूमिः कलङ्किता जाता। शान्तिनीडानि तपो-वनानि समुच्छिद्य यन्त्रागाराणि प्रतिष्ठितानि।

परिवेशदूषणं चतुर्विधं प्रख्यातं — वायुदूषणं मृत्तिकादूषणं जलदूषणं तथा शब्ददूषणं च इति। प्राणवायुं विना नराः जीवितुं न शक्नुवन्ति। प्राण-वायोः उत्पादने वृक्षाणां महान् योगः अस्ति। वृक्षाः निर्मलं स्वास्थ्यकरं प्राणवायुं उत्पादयन्ति। प्रत्येकं वृक्षः एका महती प्रयोगशाला इव भवति। एषः वृक्षः सूर्यस्य तापं हरति, वायुमालिन्यम् अपनयति, वाष्पोत्सर्गेण वातावरणे आर्द्रतां जनयति। प्रतिवर्षं निजपत्राणि निपात्य उर्वरताम् उत्पादयति, भूक्षरणं रुणद्धि, जल-वर्षणे कारणं च भवति। अतः अरण्यसमृद्धिः वायुदूषणरोधस्य प्रधानः पन्थाः।

द्वितीयप्रकारं परिवेशदूषणं मृत्तिकादूषणम्। वृक्षेण यथा वायुः शोधितः स्यात् तथैव भूमिरपि संरक्षिता स्यात्। तस्मात् अधुना वनविभागेन वृक्षरोपणाय उत्साहः प्रदीयते।

तृतीयं जलदूषणम्। गङ्गायमुनासदृशीषु स्वादुपवित्रपेयसलिलासु नदीषु नदीय-तटस्थनगराणां मलमूत्रादिकम्, औद्योगिकं विषमयरसायनदूषितजलं च नदीषु निपात्यते। विषस्वरूपाणां कीटमारकानां रासायनिकसाराणां बहुल प्रयोगात् जलानि मृत्तिकादि-कानि च दूषितानि भवन्ति। जलदूषणरोधार्थं वर्ज्यपदार्थाः जले न निक्षेपणीयाः। अनुत्क-शौचालयः निर्माणकर्तव्यः। पानीयजलस्य शुद्ध्यर्थं व्यवस्था अवलम्बनीया।

शब्द दूषणम् अपरं दूषणम् । विविधया-
नेभ्यः शब्दवर्धकयन्त्रेभ्यश्च निर्गतः प्रबलः शब्दः
शब्ददूषणं कृत्वा रोगिणां शिशूनां छात्राणां
वृद्धानां च हृदयं विदारयति । अधुना राज्यसर्व-
कारेण शब्ददूषणप्रतिरोधव्यवस्था अवलम्बिता ।
परमाणुविस्फोरणजनितं भयावहम् अपरम्
अपि दूषणमस्ति । एतेन जले स्थले नभसि
तेजस्क्रियजातं दूषणं विस्तीर्णं जातम् ।

परिवेशदूषणं पृथिव्याः सर्वेषां
देशानां प्रधाना समस्या । स्वस्तिकारणं हि
एतदेव यद् अधुना राज्यसर्वकारेण
केन्द्रीयसर्वकारेण च दूषणदूरीकरणाय
विविधोपायाः अवलम्बिताः । किन्तु
जनसचेतनासम्पादनं विना सर्वं व्यर्थं
भविष्यति ।